श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकनवतितमः सर्गः ॥

## श्रीरामस्यादेशेनाश्वमेधयज्ञस्यायोजनम्

एतदाख्याय काकुत्स्थो भ्रातृभ्याममितप्रभः।
लक्ष्मणं पुनरेवाह धर्मयुक्तमिदं वचः॥ **7.91.1** ॥

वसिष्ठं वामदेवं च जाबालिमथ काश्यपम्।
द्विजांश्च सर्वप्रवरानश्वमेधपुरस्कृतान्॥ **7.91.2** ॥

एतान् सर्वान् समानीय मन्त्रयित्वा च लक्ष्मण।
हयं लक्षणसम्पन्नं विमोक्ष्यामि समाधिना॥ **7.91.3** ॥

तद् वाक्यं राघवेणोक्तं श्रुत्वा त्वरितविक्रमः।
द्विजान् सर्वान् समाहूय दर्शयामास राघवम्॥ **7.91.4** ॥

ते दृष्ट्वा देवसङ्काशं कृतपादाभिवन्दनम्।
राघवं सुदुराधर्षमाशीभिः समपूजयन्॥ **7.91.5** ॥

प्राञ्जलिः स तदा भूत्वा राघवो द्विजसत्तमान्।
उवाच धर्मसंयुक्तमश्वमेधाश्रितं वचः॥ **7.91.6** ॥

तेऽपि रामस्य तच्छ्रुत्वा नमस्कृत्वा वृषध्वजम्।
अश्वमेधं द्विजाः सर्वे पूजयन्ति स्म सर्वशः॥ **7.91.7** ॥

स तेषां द्विजमुख्यानां वाक्यमद्भुतदर्शनम्।
अश्वमेधाश्रितं श्रुत्वा भृशं प्रीतोऽभवत् तदा ॥ **7.91.8** ॥

विज्ञाय कर्म तत् तेषां रामो लक्ष्मणमब्रवीत्।
प्रेषयस्व महाबाहो सुग्रीवाय महात्मने ॥ **7.91.9** ॥

यथा महद्भिर्हरिभिर्बहुभिश्च वनौकसाम्।
सार्धमागच्छ भद्रं ते अनुभोक्तुं महोत्सवम् ॥ **7.91.10** ॥

विभीषणश्च रक्षोभिः कामगैर्बहुभिर्वृतः।
अश्वमेधं महायज्ञमायात्वतुलविक्रमः ॥ **7.91.11** ॥

राजानश्च महाभागा ये मे प्रियचिकीर्षवः।
सानुगाः क्षिप्रमायान्तु यज्ञं भूमिनिरीक्षकाः ॥ **7.91.12** ॥

देशान्तरगता ये च द्विजा धर्मसमाहिताः।
आमन्त्रयस्व तान् सर्वानश्वमेधाय लक्ष्मण ॥ **7.91.13** ॥

ऋषयश्च महाबाहो आहूयन्तां तपोधनाः।
देशान्तरगताः सर्वे सदाराश्च द्विजातयः ॥ **7.91.14** ॥

तथैव तालावचरास्तथैव नटनर्तकाः।
यज्ञवाटश्च सुमहान् गोमत्या नैमिषे वने ॥ **7.91.15** ॥

आज्ञाप्यतां महाबाहो तद्धि पुण्यमनुत्तमम्।
शान्तयश्च महाबाहो प्रवर्तन्तां समन्ततः ॥ **7.91.16** ॥

शतशश्चापि धर्मज्ञाः क्रतुमुख्यमनुत्तमम्।
अनुभूय महायज्ञं नैमिषे रघुनन्दन ॥ **7.91.17** ॥

तुष्टः पुष्टश्च सर्वोऽसौ मानितश्च यथाविधि।
प्रतियास्यति धर्मज्ञ शीघ्रमामन्त्र्यतां जनः ॥ **7.91.18** ॥

शतं वाहसहस्राणां तण्डुलानां वपुष्मताम्।
अयुतं तिलमुद्गस्य प्रयात्वग्रे महाबल ॥ **7.91.19** ॥

चणकानां कुलित्थानां माषाणां लवणस्य च।
अतोऽनुरूपं स्नेहं च गन्धं सङ्क्षिप्तमेव च ॥ **7.91.20** ॥

सुवर्णकोट्यो बहुला हिरण्यस्य शतोत्तराः।
अग्रतो भरतः कृत्वा गच्छत्वग्रे समाधिना ॥ **7.91.21** ॥

अन्तरापणवीथ्यश्च सर्वे च नटनर्तकाः।
सूदा नार्यश्च बहवो नित्यं यौवनशालिनः ॥ **7.91.22** ॥

भरतेन तु सार्धं ते यान्तु सैन्यानि चाग्रतः।
नैगमान् बालवृद्धांश्च द्विजांश्च सुसमाहितान् ॥ **7.91.23** ॥

कर्मान्तिकान् वर्धकिनः कोशाध्यक्षांश्च नैगमान्।
मम मातृस्तथा सर्वाः कुमारान्तःपुराणि च ॥ **7.91.24** ॥

काञ्चनीं मम पत्नीं च दीक्षायां ज्ञांश्च कर्मणि।
अग्रतो भरतः कृत्वा गच्छत्वग्रे महायशाः ॥ **7.91.25** ॥

उपकार्या महार्हाश्च पार्थिवानां महौजसाम्।
सानुगानां नरश्रेष्ठो व्यादिदेश महाबलः ॥ **7.91.26** ॥

अन्नपानानि वस्त्राणि अनुगानां महात्मनाम्।
भरतः स तदा यातः शत्रुघ्नसहितस्तदा ॥ **7.91.27** ॥

वानराश्च महात्मानः सुग्रीवसहितास्तदा।
विप्राणां प्रवराः सर्वे चक्रुश्च परिवेषणम् ॥ **7.91.28** ॥

**विभीषणश्च रक्षोभिः स्त्रीभिश्च बहुभिर्वृतः।**
**ऋषीणामुग्रतपसां पूजां चक्रे महात्मनाम्॥ 7.91.29॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकनवतितमः सर्गः॥